M. T. B. COLLEGE, SURAT
Manuscripts Library

No $\frac{\text{Ref.}}{\text{Ser.}}$ 1523

Title: Tattvabodha

1523

Incomplete

		Tattvabodha	Title
		Śaṁkarācārya	Author
			Editor
			Year, Vols.
			Publisher
1523		(Also Dattātreya Aṣṭaka)	Remarks

मनंतभगरूपं पूर्णब्रह्मानंदमयं तं गुरुमर्निर्दत्तात्रेयं० ८ इति श्रीशंकराचा
र्यविरचितं दत्तात्रेयाष्टकं ॥ श्रीः वासुदेवेंद्रयोगींद्रं नत्वा ज्ञानप्रदं गुरुं मुमुक्षूणां
हितार्थाय तत्त्वबोधोऽभिधीयते साधनचतुष्टयसंपन्नाधिकारिणां मोक्षसाधनभूतं तत्त्ववि
वेकप्रकारं वक्ष्यामः साधनचतुष्टयं कीदृशमिति चेत् नित्यानित्यवस्तुविवेकः इहामुत्रार्थ
फलभोगविरागः शमादिषट्कसंपत्तिर्मुमुक्षुत्वं चेति नित्यवस्त्वेकं ब्रह्म तद्व्यतिरिक्तं सर्वम
नित्यं अयमेव नित्यानित्यवस्तुविवेकः इहामुत्र० गः कीदृश इति चेत् इहस्रक्चंदनवनितादि
षु अमुत्रस्वर्गादिभोगेषु चेच्छाराहित्यमेव शमादि० त्तिः कीदृशीति चे शमदमतपस्ति
तिक्षाश्रद्धासमाधानं शमः कीदृशः अंतरिंद्रियनिग्रहमेव शमः दमः कीदृशः बाह्येंद्रिय
निग्रहमेव दमः स्वधर्मानुष्ठानमेव तपः शीतोष्णद्वंद्वसुखदुःखादि सहिष्णुत्वमेव ति
तिक्षा गुरुवेदांतवाक्येषु विश्वासः श्रद्धा चित्तैकाग्रता समाधानं स्वयं मोक्षं प्राप्नुयामि

तिभावोयदस्ति तन्मुमुक्षुत्वं एतत्साधनचतुष्टयं ततस्तत्त्वविवेकस्याधिकारिणो भवंति तत्त्ववि
तत्व वेकः कीदृशः आत्मा सत्यमात्मनोन्यन्मिथ्येति ज्ञानमेव तत्त्वविवेकः आत्मा कीदृशः स्थूलसू
क्ष्मकारणव्यतिरिक्तः पंचकोशातीतः सन् अवस्थात्रयसाक्षी सच्चिदानंदस्वरूपः सन्यस्
५ तिष्ठति स एवात्मा स्थूलशरीरं कीदृशं पंचीकृतपंचमहाभूतैः कृतं सत्कर्मजन्यं सुखदुः
खादिभोगायतनं अस्ति जायते वर्धते विपरिणमते अपक्षीयते विनश्यति इति षड्भाव
विकाराः मध्येचागत्यमध्येगच्छति एतत्स्थूलशरीरं सूक्ष्मशरीरं कीदृशं अपंचीकृतपंच
महाभूतैः कृतं सत्कर्मजन्यं सुखदुःखादि भोगसाधनं ज्ञानेंद्रियपंचकं कर्मेंद्रियपंचकं प्रा
णादिपंचवायवः मनश्चैकं बुद्धिश्चैकं एवं सप्तदशकलाभिः सह तिष्ठति एतत्सूक्ष्मं का ५
रणशरीरं कीदृशमिति चेत् अनाद्यविद्यानिर्वचनीय शरीरयोः कारणमात्रं सत्स्वरूप
ज्ञानं यदस्ति तत्कारणशरीरं अवस्थात्रयं कीदृशं जाग्रत्स्वप्नसुषुप्त्यवस्थास्तिस्रो वर्तंते
जाग्रदवस्था कीदृशी श्रोत्रादि ज्ञानेंद्रियैश्च शब्दशब्दादि विषयैश्च ज्ञायते इयं जाग्रदवस्था

स्थूलशरीराभिमान्यात्मा विश्व इत्युच्यते स्वप्नावस्था कीदृशी जाग्रदवस्थायां यद्दृष्टं य
ज्जनितं यच्छ्रुतं वासनया निद्रासमये प्रपंचः प्रलीयते तत्स्वप्नावस्था स्वप्नावस्था सू
क्ष्मशरीराभिमान्यात्मा तैजस इत्युच्यते सुषुप्त्यवस्था कीदृशी अहं किमपि न जा
नामि सुखेन मया निद्रानुभूयत इति यत् तदवस्था सुषुप्तेः कारणशरीराभिमा
न्यात्मा प्राज्ञ इत्युच्यते अथ पंचकोशाः कीदृशाः अन्नमयः प्राणमयः मनोमयः
विज्ञानमयः आनंदमयः ५ अन्नमयः कीदृशः अन्नरसेनैव भूत्वा अन्नरसेनैवाभिवृद्धिः
अन्नरूपपृथिव्यां यद्विलीयंते सोऽन्नमयः कोशः स्थूलशरीरं प्राणमयः कोशः कीदृशः
प्राणादि पंचवायवश्च वागादि पंचकर्मेंद्रियैर्मिलित्वा प्राणमयः कोशः मनोमयः कोशः
कीदृशः मनश्च ज्ञानेंद्रियपंचकेन मिलित्वा मनोमयः कोशः विज्ञानमयः कीदृशः बुद्धिर्ज्ञा

नेंद्रियपंचकेनमिलित्वाविज्ञानमयःकोशोभवति कोशत्रयात्मकं सूक्ष्मशरीरं आनंदम
त- यःकीदृशः एवमत्रप्रियमोदादिलक्षणमेवमानंदमयःकोशः एतत्कोशपंचकं मदीयंश
रीरं मदीयःप्राणःमदीयंमनश्च मदीयंबुद्धिः बुद्धिरियंज्ञानमितिस्वयमेवज्ञायते तद्यथा
६ स्वयंनिर्वद्गातःकुंडलादिकं तस्माद्भिन्नंवर्तते तथापंचकोशआत्मानभवति आत्माकी
दृशः सच्चिदानंदःस्वरूपः सत्किं कालत्रयेपियदस्तितत्सत् चित्किं ज्ञानस्वरूपंचि
त् आनंदःसुखस्वरूपः एवंसच्चिदानंदआत्मस्वरूपंजानीयात् अथचतुर्विंशति
तत्वोत्पत्तिप्रकारंवक्ष्यामः ब्रह्माश्रयासत्वरजस्तमोगुणात्मिकामायास्ति तस्मा ६
द्वाएतस्मादात्मनआकाशःसंभूतः आकाशाद्वायुः वायोरग्निः अग्नेरापः अद्भ्यः
पृथिवी एतेषांपंचतत्वानांआकाशसात्विकांशात् श्रोत्रेंद्रियसंभूतं वायुःसात्वि
कांशात् त्वगिंद्रियसंभूतं अग्नेःसात्विकांशात् चक्षुरिंद्रियसंभूतं जलस्यसात्वि

कांशात्रसनेंद्रियसंभूतं पृथ्वीसात्विकांशात् घ्राणेंद्रियसंभूतं एतेषांपंचतत्वानांसमष्टिसा
त्विकांशात् मनोबुध्यहंकारचित्तांतःकरणचतुष्टयंसंभूतं एतेषांपंचतत्वानां आकाशरजों
शात् वागिंद्रियसंभूतं वायोरजोंशात्पाणींद्रियसंभूतं अग्नेरजोंशात्पादेंद्रियसंभूतं ज
लस्यरजोंशात् गुह्येंद्रियसंभूतं पृथ्वीरजोंशात् पायुरिंद्रियसंभूतं एतेषांपंचतत्वानांसमष्टि
रजोंशात् प्राणादिपंचकं नागकूर्मकृकरदेवदत्तधनंजयाउपवायवःसंभूताः एतेषांपंचतत्वा
नांतामसांशात् पंचीकृतपंचमहाभूतानिसंभवंति पंचीकरणंकीदृशं एतेषांपंचभूतानांता
मसांशात् पंचीकृतपंचमहाभूतानिसंभवंति पंचीकरणंकीदृशमिति एतेषांपंचभूतानांता
मसांशमेकंद्विधाविभज्यशेषंपंचक्षिप्यपरार्धंचतुर्धाविभज्य स्वांशंपरित्यज्यतेषुमेलयेदि
तियसंचीकरणं एतेभ्यःपंचीकृतपंचमहाभूतेभ्यः स्थूलशरीरं ब्रह्मांडंचसंभूतं स्थूलशरी
राद्यभिमानीजीवः आत्मन्येवप्रकृत्याजीवेश्वरभेददृष्टिर्यावत्स्येतांतिष्ठति तावत्संर्प

तं॰ तं जन्ममरणादि संसारो न निवर्तते तस्मात्कारणात् जीवेश्वरयोर्भेददृष्ट्या ज्ञानीयादित्यर्थः
ननु साहंकारस्य जीवस्य निरहंकारिणः ईश्वरस्याभेददृष्टिः कल्पितकथामुपयुक्ता इत्याशंक्य
७ जीवपदस्येश्वरपदस्य वाच्यार्थलक्ष्यार्थो द्विति अर्थद्वयमस्तीत्युच्यते जीवपदस्य वाच्यार्थः
कथमिति चेत् मायातत्कार्यभूतसर्वज्ञत्वादिगुणांश्चेश्वरपदस्य वाच्यार्थः तस्मात्का
रणात् जीवोपाधिकर्तृत्वभोक्तृत्वादिगुणभूतविधानकार्याणि परित्यज्येश्वरोपाधिभू
तमायां च सर्वज्ञत्वादिगुणांश्च परित्यज्य जीवेश्वरयोरैक्यं महावाक्याश्च यदुक्तं ब्रह्मै
वेति वेदांतवाक्येश्च यदुक्तं ब्रह्मसत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरमिति सद्गुरूपदेशेन
तत्संगसात्स्वानुभवेन च ये पुमांसो विजानंति ते जीवन्मुक्ता इत्यर्थः जीवन्मुक्तः कीदृशः
अपरोक्षज्ञानवान् जीवन्मुक्तः कीदृशमपरोक्षज्ञानं उच्यते यथा देहोहं पुरुषोहं स्त्रीयो
हमिति दृढनिश्चयज्ञानं तिष्ठति तथा निजस्वरूपसत्यज्ञानानंतात्माहमेवेति दृढनिश्च

यज्ञानं यदस्ति तदिदमपरोक्षज्ञानं तेनापरोक्षज्ञानाग्निना सकलकर्मबंधननिवृत्तिः स्यात् कर्मा
णि कतिविधानि संतीति चेत् आगामि संचितप्रारब्धानि त्रिविधानि कर्माणि संति आगामि
कर्म कीदृशं ज्ञानोत्पत्त्यनंतरं ज्ञानदेहकृतपापपुण्यरूपं यदस्ति तदिदमागामिकर्मेत्युच्यते सं
चितकर्म कीदृशमिति अनंतकोटि जन्मनां बीजवत्कारणभूतं सद्यास्तिष्ठति तत्संचितकर्मेत्यु
च्यते प्रारब्धकर्म कीदृशमिति इदं शरीरं जनयित्वेहलोक एव सुखदुःखादिकं कर्म यदस्ति
तत्प्रारब्धकर्मेत्युच्यते भोगेन नष्टं भवति प्रारब्धकर्मणां भोगादेव क्षयः ज्ञानाग्निनासं
चितकर्म दग्धं भवति ज्ञानाग्निरिति भगवद्वचनं आगामि कर्म नलिनदलगतजलवत् ज्ञा
निनः संबंधो नास्त्येवेदमागामि कथं न स्यात् इत्याशंक्य ज्ञानिनं लोके ये पुमांसः
अन्नवस्त्राणि दत्त्वा रक्षंति तेषां न कृतं सर्वसुकृतं भागामि इति ये चैतान् प्रदुःष्यंति ति
रस्कुर्वंति तेषां तत्कृतं सर्वं पापकर्म मागामि प्यातीति सर्वप्रकारेण ज्ञानी सकलकर्मभ्यः

ते. त्तरतिश्रुतिरपिप्रमाणमस्तीत्युच्यते तरतिशोकमात्मवित् इतिसंपूर्णं एकोदेवः सर्व
६ भूतेषुगूढः सर्वव्यापी सर्वभूतांतरात्मा सर्वाध्यक्षः सर्वभूताधिवासः साक्षीचेता केवलो
निर्गुणश्चेतिश्रुतेः भिद्यतेहृदयग्रंथिश्छिद्यंतेसर्वसंशयाः क्षीयंतेचास्यकर्माणि तस्मिन्
दृष्टेपरावरे इतिश्रीमत्परम० शंकरा० तत्त्वबोधप्रकरणम्